No. ४५८२

Title चतुर्वर्गचिन्तामणौ श्राद्धकल्पः

Author हेमाद्रिः कामदेवसुतः

Extent ~~३८~~ १८ पत्राणि Age ×

Subject धर्मशास्त्रम्

श्राद्धप्रशंसा श्राद्धकल्पो वा

४५८२

१ श्रुतिस्मृतिपुराणेभ्यो मया हेमाद्रितोद्धृतं। श्राद्धकल्पमिदं सम्यक् पितृणां तुष्टिकारकं।

श्रीगणेशाय नमः॥ श्रीगुरुभ्यो नमः॥ अथ श्राद्धप्रशंसा॥ नागरखंडे॥ लोकांतरेषु ते तोयं लब्धान्नं तेनान्नमे
वच॥ दत्तं न वंशजैर्येषां ते कथं यांति दारुणं॥ क्षुत्पिपासासमुद्भूतां तस्मात्संतर्पयेत् पितॄन्॥ नित्यं यथा शक्त्या
यथा राजंस्तोयैर्नानाविधैः पृथग्विधैः॥ तथान्यैर्वस्त्रनैवेद्यैः पुष्पगंधानुलेपनैः॥ पितृमेधादिभिः पुण्यैः श्राद्धै
रुच्चावचैरपि॥ तर्पितास्तेऽप्ययच्छंति कामान्निष्ठान् हृदिस्थितान्॥ त्रिवर्गं च महाराज पितरः श्राद्धतर्पिताः॥
ब्रह्मपुराणे॥ एवं सम्यग्गृहस्थेन देवताः पितरस्तथा॥ संपूज्या हव्यकव्याभ्याम् अन्नेनातिथिबांधवाः॥ आचार
मा च रस्तत्र पितृमेधाश्रितं नरः॥ आयुषा धनपुत्रैश्च वर्द्धते नैव संशयः॥ विष्णुपुराणे॥ ब्रह्मेंद्ररुद्रनासत्य
सूर्याग्निवसुमारुतान्॥ विश्वेदेवान् पितृगणान् वयांसि मनुजान् पशून्॥ सरीसृपान् पितृगणान् यच्चान्यद्भूतसं
ज्ञितं॥ श्राद्धं श्रद्धान्वितः कुर्वन् प्रीणयत्यखिलं जगत्॥ येन केनचित्सुरूपेणास्वीयपितृपितामहाद्युद्देशेन
श्राद्धे क्रियमाणे ब्रह्मेंद्रादीनामनुद्दिष्टानामप्यनेकेषामेकस्मिन्नेव प्रयोगे युगपत्प्रीतिरन्यकुलोत्प
न्नानामपि सरीसृपादीनां च तृप्तिः स्यादिति वचनार्थः॥ श्राद्धकर्तृकुलोत्पन्नानां तु नानायोनिगता
नामनुद्दिष्टानामप्यनेकेषामेकस्मिन्नेव योगे तत्पृथक् श्राद्धे क्रियावयवैस्तृप्तिः स्यादिति व्यक्तं

क्तं मार्कंडेयस्कांदे ब्रह्मपुराणेषु ॥ नागरखंडे ॥ श्राद्धे तु क्रियमाणे वै न किंचित् व्यर्थतां व्रजेत् ॥ उछिष्टमपिरा
जेंद्र तस्माछ्राद्धं समाचरेत् ॥ द्विजपादोदकं यच्च भूमौ पतति पार्थिव ॥ तेन ये गोत्रजाः केचित् पुत्रा मरणं गताः
॥ तावत्तुष्यंत्यपात्रैस्ते पिबंति पितरो जलं ॥ श्राद्धे प्रक्रियमाणे तु यत्किंचित् पतति क्षितौ ॥ पुष्पगंधादिकं चान्न
मपि तोयं नरेश्वर ॥ तेन तृप्तिं परां यांति ये हतिर्यक्त्वमुपागताः ॥ कीटत्वं वा पिपीलत्वं व्यालत्वं वा नराधिप ॥ य
दुच्छिष्टं क्षितौ पाति पात्रभ्रष्टान्नतोयवं ॥ तेन तृप्तिं परां यांति ये प्रेतत्वमुपागताः ॥ ये चाप्यसंस्कृता केचि
न्मृताः संस्काराः स्ववंशजाः ॥ विकिरेणाग्रदत्तेन तृप्तिं ते यांति चाखिलाः ॥ तदेवं श्राद्धावयवैः केषामपि विं
श्यानां तृप्तिरुक्ता ब्राह्मणभोजनादिना प्रधानकर्मणा तु मुख्यानामुद्दिश्यमानानां पितृपितामहा
दीनां तृप्तिर्भवतीत्युक्तं ॥ स्कांदे ॥ पितॄनुद्दिश्य यत्किंचिद्ब्राह्मणेभ्यश्च दीयते ॥ संप्रयच्छ श्रद्धापरैर्मर्त्यैस्तत्प्रा
वन्ति तृप्तिदं महत् ॥ मृतानां यदि जंतूनां श्राद्धमाप्यायनं ततः ॥ निर्वाणस्य प्रदीपस्य तैलं संवर्धये
दि खं ॥ ~~अनिष्टाचाद्यपितरदेवता ॥ तथा नकुलमादिदेवता~~ ॥ अतींद्रियज्ञानमुक्तानामागम
न शक्तिमुक्तं च श्राद्धदेशे जत्यागतानां वायवीयेन शरीरेणाप्राक्षणाशरीराविष्टानां तृप्तिर्भव

१

तीस्मृतं ॥ कूर्मपुराणे ॥ तस्य तेपितरः श्रुत्वा श्राद्धकालमुपस्थितं ॥ अन्योन्यंमनसाध्यात्वासंपतंतिमनोजवाः ॥
तेब्रह्मणैः सहाश्नंतिपितरोह्यंतरिक्षगाः ॥ वायुभूतास्तुतिष्ठंतिभुक्त्वायांतिपरांगति ॥ मत्स्यपुराणे ॥ निमंत्रि
तांस्तान्द्विपितरउपतिष्ठंतितान्द्विजान् ॥ वायुभूतानुगच्छंतितथासीनानुपासते ॥ तथा एकआह्मणपद्मेबौ
धायनः ॥ उरस्थाः पितरस्तस्य वामपार्श्वे पितामहाः ॥ प्रपितामहादक्षिणतः पृष्ठतः पिंडतर्पकाः ॥ नागरखं
डेपि ॥ श्राद्धदेशंव्रजंतिपितरोमागमनुत्तमं ॥ अमावास्यादिनेप्राप्ते गृहद्वारं समाश्रिताः ॥ वायुभूताः प्रवांछंति
श्राद्धं पितृगणानृणां ॥ यावदस्तमयंभानोः क्षुत्पिपासासमाकुलाः ॥ ततस्त्वस्तंगतेभानौ निराशा दुःखसंयुताः
॥ निश्वस्यसुचिरंयांतिगर्हयंतःस्ववंशजं ॥ नर्दपरूउवाच ॥ अत्यद्देहंसमाश्रित्य भुंजतेकर्मणःफलं ॥ शुभं
यदशुभंजैः श्राद्धंस्वयंविहितमात्मनः ॥ नागरखंडे ॥ तर्पयंति न ये पापाः स्वान्पितॄंनिस्पृशान्नृप ॥ पश्चाद्वसे
नराज्ञेयाद्विपदांशृंगवर्जिताः ॥ अल्पप्रयासंमहाफलं श्राद्धमकृत्वाप्रत्यवायरूपमनर्थमंगीकुर्वाणा
स्तमोगुणाद्धन्नराः नाहिताहितमप्रतिपद्यमानाः पशुसाम्यात्पशवः ॥ तथाजजेनापिचतः श्राद्धंश्रावक
नापिकरोतियः ॥ अमायांतिपितरस्तस्यशापंदत्त्वाप्रयांतिच ॥ हारीतस्मृतौ ॥ न तत्र वीरा जायंते ना

श्रु ४

रोगा नशतायुषः॥ न च श्रेयोऽधिगच्छंति यत्र श्राद्धं विवर्जितं॥ अपि मूलैः फलैर्वापि तथाप्युदकतर्पणैः॥
अविद्यमाने कुर्वंति नैव श्राद्धं विवर्जयेत्॥ विष्णुस्मृतिः॥ अमावास्यादिकालाननुक्रम्योक्तं॥ एतानि श्राद्धकाला-
नि नित्यान्याह प्रजापतिः॥ श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते॥ ब्रह्मपुराणे॥ न संति पितरश्चेति कृत्वा मनसि
यो नरः॥ श्राद्धं न कुरुते तत्र तस्य रक्तं पिबंति ते॥ इति एवं श्राद्धप्रशंसा॥ द्वापरे श्राद्धमहात्म्यमुक्तं॥
न्यायार्जितधनसंपादितशालियवादिनिष्पादितैरतिशयरमणीयैरन्नैर्वेदवेदार्थविद्पात्रीभूतान् निमंत्र
णादिविधिना संम्यक्संपादितान् द्विजानुपवेश्य यथाविधि श्राद्धं सतत्वतामायुरारोग्यादीनि निश्रेयसप
र्यंतानि फलानि भवंतीति॥ तथा च विष्णुधर्मोत्तरे॥ स्वर्गं च मोक्षं च यशः सुखानि राज्यं च पुत्रान् धर्मभूमि
पालन॥ स्त्रियश्च मुख्या विविधांश्च कामा देवेश्वरः श्राद्धरतो विधत्त इति॥ तथा॥ अन्यान्यपि श्राद्धविशेषा
दपि फलानि भवंति॥ तद्यथा॥ आन्नद दधि [illegible] दधे कर्मजे कर्म्मसाद्गुण्यं॥ तीर्थयात्रां गेयात्रा सलि
कृषु प्रत्यवायानुत्पन्निरूपा तदुपरि तत्क्षयश्च॥ गयादितीर्थश्राद्धेषु पितॄणां विशिष्टलोकावाप्तिः॥ पितृ
ट द्विरुक्त सर्वेष्वपि श्राद्धेषु प्रयोजनमस्ता॥ श्राद्धविधिपाठस्यापि फलं [illegible] तेनोक्तं॥ इमं श्राद्धविधिं पुण्यं

२

कुर्याद्वापि पठेच्चयः ॥ स सर्वकामसंयुक्तो ह्यमृतत्वं च विंदति ॥ बृहस्पतिनानुश्राद्धविधिर्यो नोपदेशानुमतीनामपि फलमु
क्तं ॥ य एवं वेत्तिमत्ति मासस्य श्राद्धफलं स वेदिति ॥ उपदेष्टानुमंता च लोके तुल्यफलौ स्मृताविति ॥ इति फलं ॥ अथ तूपुरा
ते ॥ क एते पितरो नाम वर्त्तंते द्यकृच ते उभो ॥ पुत्रा श्राद्धकस्य ते तास्तेषां कथं पितरः स्मृता ॥ कथं वा ते समुत्पन्ना कस्य पु
त्राः किमात्मनः ॥ स्वर्गे वै पितरो ह्येतु देवानामपि देवता ॥ स्वर्गे तु वर्त्तंते पितरो नरके तु के ॥ किमर्थं ते न दृश्यते ॥
तत्र तावदुत्पत्तिः ॥ सा च द्विधा पुराणेषु दृश्यते ॥ क्वचित् साक्षाद्ब्रह्मशरीरात् क्वचिद्य वधानेन ॥ तत्र तावत् साक्षादिति धीय
ते ॥ विष्णुपुराणे ॥ सत्वमात्रात्मिकामेव ततोन्यां जगृहे तनुं ॥ पितृवन्मन्यमानस्य पितरस्तस्य जज्ञिरे ॥ उत्ससर्ज
पितृन् सृष्ट्वा ततस्तामसृजत्प्रभुः ॥ आदित्यपुराणे ॥ सततः पितरो ह्येयास्तता यैचान्नवस्तुता ॥ मनुष्याणां पशूनां च प
व५ क्षिणां सरीसृपां ॥ स्थावराणां च पंचानां पुष्पकासार्त्तवः स्मृतः ॥ इत्यत्तिधानात् ॥ कालिकापुराणेषु संरूका ॥
पितरः प्रदुक्ता ॥ षड्मधादयः ॥ स्तेसृतवः पितरो देवा इति वैदिकी श्रुतिः ॥ मधुमाधवौ ॥ शुचिशुक्रौ शु
भिणौ ॥ तौ नभौ नभस्यौ जंत्रावेता विवोऽर्जो स्वधावेतौ सह सहस्यौ मन्यतौ तौ तपस्तपस्यौ शोशिशे ह्योरे
कृतवो ब्रह्मणा आत्मजास्वेते ॥ षड्भिः संवत्सरः प्रजापतिः संवत्सरोऽग्निर्यत मुच्यते स ताश्च ऋतवो जज्ञिरे

तेभ्यः स्वधा सुजंगमा ॥ सनुः कालेऽस्मस्मा सर्वमुत्पद्यते तस्मात्पितरस्त्विति ॥ पितृणामुत्पत्तिरुक्ता ॥ तथा ... शरद्धेमंतः
शिशिर इति ॥ एत एव सोमवंतो बर्हिषदोऽग्निष्वात्ताश्च तथा च ॥ शातपथी श्रुतिः ॥ मृत्यहविषा ह्वै देवा वृत्रं जघ्नुस्तेनो
एव व्यजयंत येयमेषां विजितिस्ता मध्ययाने वैषां तस्मिन्संग्रामे घ्नंस्तान्यिष्टं यज्ञेन स मैरयंत पितरो वै तत्र आसंस्तस्मा
त्पितृयज्ञो नाम ॥ तद्वसंतो ग्रीष्मो वर्षा पितते ते येव्यजयंत शरद्धेमंतः शिशिरस्त उ ते यान्त्सुनः स मैरयंत ॥ तथा न
घे सोमेनेजानास्ते पितरः सोमवंतो येऽदत्तेन लोकं जयंति ते पितरो बर्हिषदो ये ततोऽन्यत रक्षनयानग्निरेव
दहन्स्वदयति ते पितरोऽग्निष्वात्ता एत उ ते ये पितरः ॥ याज्ञवल्क्यस्मृतौ ॥ वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः ॥
इति ॥ अथ गुह्याः पितर उच्यंते ॥ नंदिपुराणे ॥ अग्निष्वात्तादीन्पितॄन्वेदानन्ति धायमहेश्वरे पोक्तं ॥ अथामरा
श्च पितरो गुह्याश्च तु गणोत्तमाः ॥ ब्रह्मादित्रयं पितरः ॥ [illegible] ॥ तथा नंदिपुराणे
॥ अग्निष्वात्ता ब्राह्मणानां पितरः परिकीर्तिताः ॥ राज्ञां बर्हिषदो नाम विश्यां काव्याः प्रकीर्ति
ताः ॥ सुकालिन शूद्राणां व्यामात्म्येच्छांत्यजातिषु ॥ अथ तेषां महात्म्यं ॥ ब्रह्मवैवर्ते ॥ श्राद्धै
राप्यायितः सोमो लोकमाप्याययिष्यति ॥ ससमुद्रं सपर्वतवनं जंगमेतरं ॥ एवमाश्राद्धेत

सर्वं ब्राह्मणा परमेष्ठिना ॥ तन्तुहन्ता न जाघतारः पितरो न संशयः ॥ पितॄणां हि बलं योगो योगात्सोमः प्रव-
र्तते ॥ मनुस्मृतौ ॥ अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः ॥ न्यस्तशस्त्रा महाभागाः पितरः पूर्वदे-
वताः ॥ अथ पितॄणां मार्गः ॥ वाराहे पुराणे ॥ इत्युक्तास्तांस्तदा ब्रह्मा तेषां पंथानमादिशत् ॥ दक्षिणा-
यनसंज्ञं तु पितृयानं पितामहः ॥ पितृयज्ञस्वरूपप्रकरणम् ॥ अथ श्राद्धदेवता ॥ स्मृतमनुष्याणां श्राद्धेऽस्य
मूलं देवतात्वं विना न संभवतीति ॥ इच्छंति पितरः पुत्रान्नरकापातभीरवः ॥ पितृत्वो जाति लीनो पितरमा-
कुर्यात्पितृक्रियामिति ॥ तथा ॥ तस्मै तस्मै य एषा प्रेतास्य इति गाथा गाथाः ॥ प्रेतेभ्य एव निष्कृतीयादि-
तितोऽस्य वसिरिति ॥ शातपथश्रुतौ च चतुर्थं तत्पितृपितामहादिलिंगकमंत्राम्नानं दृश्यते ॥ अस्मा-
वेतन्न इति यजमानस्य पित्रे ऽसौ वेतत्त इति पितामहाय ॥ असौ वेतत्त इति प्रपितामहाये ॥ इति तथा
एतत्त्रये चत्वा मन्त्रित्येवमादिषु पिंडदानावनेजनोञ्जनाभ्यंजनादिप्रतिपादकेषु मन्त्रेषु मृतम-
नुष्यप्रकाशनस्य दर्शनात् ॥ न हि प्रयोगासंभवे तं मंत्रप्रकाश्यमिति युज्यते ॥ न च मृतमनुष्या-
णां देवतात्वे मंतरेणाप्रयोगसमवायः संभवति ॥ साक्षान्मृतमनुष्योद्देशनिषिद्धः श्राद्धेषु दृश्यते

तथा च विज्ञानधर्मोत्तरे वाराहवचनं ॥ प्राग्यमस्तिलोकेषु प्रेतानुद्दिश्य वै पितॄन् ॥ ये तु श्राद्धं करिष्यन्ति ते
षां पुष्टिर्न विद्यते । नागरखंडे ॥ पितृन्युतिब्रह्मवचनं ॥ पितुः पितामहाश्चैव तत्पितुश्च ततः परं ॥ सम
द्देशेन दत्तो हि ब्राह्मणेभ्यः प्रमन्त्रितः ॥ सर्वेषां स्यात्तरात्रिपार्वणादाहूतसंप्लवं ॥ अध्ययनविध्यपे
क्षितं क्रियान्निधानं परत्वं तु समस्त्वतिक्रामं तमनुष्याणां देवतात्वमुत्पत्तिशिष्टत्वान्न देवतांतरविधि
पिंडाः संभवतीति ॥ न मुख्यत्वे तरपिदर्शनात् ॥ तथा हि पयमास्यादिषु ॥ पितृयज्ञं तु निर्वर्त्य तर्पणाख्यं
तु योग्निमान् ॥ पिंडान्वाहार्यकं कुर्यात् श्राद्धमिंदुक्षये सदा ॥ मनुस्मृतावपि ॥ पार्वणस्य पशुश्चैवोत्पत्तिः
॥ पितृयज्ञं तु निर्वर्त्य विप्रश्चंद्रक्षयेग्निमान् ॥ कुर्यान्न्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकमिति ॥ अ
नेकेषु च श्राद्धकल्पेषु च नित्यश्राद्धामावास्याश्राद्धादीनां पितृत्योद्देशाद्दिग्भेदेन विधेयत्वात्पितृविधि
र्दृश्यते ॥ नित्यनैमित्तिककाम्येषु श्राद्धेषु अग्निष्वात्तादीनां वै कस्यचित् देवतात्वं ॥ क एतो पितरो नाम येभ्यो
दत्तमिहान्नं यं भवति ॥ वसवः पितरो रुद्राः पितामहाः आदित्याः प्रपितामहास्तेभ्यो दत्तमिहान्नं यं
भवति ॥ देवत्वस्मृतौ ॥ सर्वत्र पितरः प्रज्ञा देवतानां च देवताः ॥ सुचयो निर्मलाः शुद्धा दक्षिणां दिशिमा
श्रिताः ॥

वसवः पितरो ऽरुद्रा इत्यादि ॥ अतो देवताविकल्पः ॥ महार्णवप्रकाशकारादयस्तु देवताव्यवस्थां मन्यंते ॥ तथा
हि त्रिः प्रकाराः पितरः ॥ एके जनकादयः ॥ अपरे मरीच्यादिसुताः सोमपादयः ॥ अपरे वस्वादयः ॥ तत्र जनका
दि असंसर्गिकं श्राद्धं ॥ तथा च शातपथी श्रुतिः ॥ असावेतत्त इत्येव यजमानस्य पितर इति ॥ तथा मनुस्मृतिः ॥
प्रपिताः प्रेतस्येति ॥ तथा ॥ ध्रियमाणे पितरि पूर्वेषामेव निर्वपेदिति ॥ न जीवंतमतिक्रम्य किंचिद्दद्या
दिति ॥ इत्येवमादिवाक्यैर्मृतपित्राद्युद्देशेन पितृकार्यं विधीयते ॥ तस्योद्देशस्य क्वचिदपवादः स्म
र्यते ॥ ब्राह्मणादिहते चैव पतिते संगवर्जिते ॥ व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसौ ॥ आत्मनस्त्यागि
नां चैव निवर्त्तेतोदकक्रियेत्यादि ॥ एवं च पतितपितृकः श्राद्धकर्त्ता पितामहादिभ्यः श्राद्धं करोति ॥ पतितपि
तृपितामहश्च प्रपितामहादिभ्यस्त्रिभ्यः ॥ उक्तं हि ॥ प्रपितामहस्तु वै येभ्यो जीवन्पितृपितामहः ॥ तेभ्य एव
स श्राद्धे प्रदद्यात् तौ च पूर्ववत् ॥ सर्वेषु त्रिषु दातव्यं जीवेच्चत्रितयं यदि ॥ महापितृयज्ञे चोक्तं ॥ त्रीन्पितरा
न्पितुः तथा च षष्ठे प्रपाठके प्रथमे पिंडे पंचमं द्वितीये च चतुर्थं तृतीये सप्तमे नित्येत्रिः प्रतीयत इति ॥ तत्र पित्रादी

नांत्रिचतुराणां पिंडायोग्यत्वे सप्तमादिष्वपश्चपिंडनिषेधपार्वणश्राद्धपिंडपितृयज्ञयोश्च नित्यत्वेन
योः कथमनुष्ठानमित्यपेक्षायामुक्तं ॥ सोमपानामविज्ञाणामित्यादि वसवः पितरो ज्ञेया इत्यादि च ॥
तस्मात्तातितापित्रादिविषये सोमपादीनां वस्वादीनां चामावास्यादिश्राद्धपितृयज्ञे च देवतात्वं ॥ त
थाचापस्तंबगोभिलौ ॥ यदि नामविद्यात्स्वधापितृभ्यः पृथिवीषद्भ्य इति प्रथमं पिंडं दद्यात्स्वधा
पितृभ्यो अंतरिक्षसद्भ्य इति द्वितीयं स्वधापितृभ्यो दिविषद्भ्य इति तृतीयमिति ॥ अनेन वस्वेकत्ववि
शिष्टस्य कस्यचिद्देवतात्वं बोधितं ॥ बहुत्वविशिष्टेन पितृत्वेन च शास्त्रांतरे सोमपादयो वस्वाद
यश्च दर्शिताः ॥ अतस्तेषामेव पृथिवीषदादिशब्देनाभिधानमित्येषैव लघीकस्ययालिंगदर्शना
च्च सोमपादीनां देवतात्वं ॥ तथा च ब्रह्मपुराणे ॥ पितृन्पितामहान्पश्चात्तांज नेनयथाक्रमं ॥ अपि
तामहाः सर्वोश्चतत्पितृंश्चानुपूर्वशः ॥ उशंतस्त्वेति चजपन्निदृनावाहयेन्नतः ॥ सोमवंतो बर्हिष
दश्चाग्निष्वात्ता स्तथैव ये परे ॥ पितरः पुण्ययशसः संतर्प्यायं तु नस्त्विति ॥ वैदिकाश्च मंत्राः ॥ आयंतु नः

पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैरिति ॥ तथा ॥ अग्निष्वात्ताः पितर एह गच्छत सदः सदः स
दत सुप्रणीतय इति ॥ तथा ॥ बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वमिति ॥ तथा ॥ आंगि
रसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यास इति ॥ येन नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपी
थं वसिष्ठा इति ॥ तथा ॥ उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेष्विति ॥ तथा ॥ अग्निष्वात्ता
नृतुमतो हवामहे नाराशंसे सोमपीथं य आशुरिति ॥ महाहविःसंज्ञके षट्कपालादि निर्वर्त्यैः पितृ
यज्ञे च दृश्यते ॥ तथा च शतपथे ॥ महाहविषा ह वै देवा वृत्रं जघ्नुरित्युपक्रम्य तस्माद्वा एष एतेन य
जत इत्यंतेन सार्थवादकेन वाक्येन पितृयज्ञं विधायोक्तं ॥ स पितृभ्यः सोमवते षट्कपालं पुरो
डाशं निर्वपति सोमाय वा पितृमत इत्यादि ॥ तथा अथ पितृभ्यो बर्हिषद्भ्योऽन्वाहार्यपचने धानाः
कुर्वंतीति ॥ अथ पितृभ्योऽग्निष्वात्तेभ्यो निवान्यायै दुग्धे सकृदुपमथितं एकशलाकया मंथोम
वतीत्यादि ॥ एतच्चाग्निष्वात्तादिपदानामर्थवादैकरूपत्वे कथंचिन्नोपपद्यते ॥ तर्पणे च दृश्यते ॥ सो

6

मं विरमंतं यममंगिरस्वतं ॥ अग्निं कव्यवाहनं तर्पयेत्सोदिदि ॥ श्राद्धप्रयोगेन देवतात्वेन तु मनुष्योद्देशो
क्रियमाणे मनुष्येषु सोमपादिवस्वादिविष्ण्वादिप्रद्युम्नादिमासादिवरूपाद्यभेदारोपः कर्तव्यः इति ॥
अभेदारोपप्रदर्शनाय च द्विजैः सोमपरूपेभ्य इत्यादयः ॥ क्षत्रिये स्कन्दहविष्मद्रूपेभ्य इति ॥ वैश्ये स्वाज्यपरूपेभ्य
इति ॥ शूद्रे स्कन्दसुकालिरूपेभ्य इति शब्दाः प्रयोज्याः ॥ अथवा अस्मत्पितृपितामहप्रपितामहेभ्यो वसु
रुद्रादित्यरूपेभ्य इति वा विष्णुब्रह्मरुद्ररूपेभ्य इति वा प्रद्युम्नसंकर्षणवासुदेवरूपेभ्य इति वा मासर्तु
संवत्सररूपेभ्य इति वा सर्वैरेव शब्दाः प्रयोज्याः ॥ पिंडदाने तु वरुणप्रजापत्यग्निरूपेभ्य इत्यपि प्र
योज्यं ॥ [illegible] ॥ अथ केषु त्रिक्रियसंख्याउद्देश्या इत्यपेक्षा
यामुच्यते ॥ तत्र तावन्मुख्यपार्वणे पित्रादित्रयः ॥ मातामहादित्रयः ॥ एवं षण्मनुष्याः ब्राह्मणभोज
नेन पिंडदानेन च सपत्निकाउद्देश्याः ॥ मस्य पुरस्तोपि ॥ पित्रादीनां त्रयाणां पिंडनं तत्व मुक्तं ॥ लेपभाज
श्चतुर्थाद्याः पित्राद्याः पिंडभागिनः ॥ पिंडदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषमिति ॥ तस्माच्चतुर्थ

६

पंचमषष्ठास्त्रयपुरुषाक्षेपभागिनः॥ कुर्यान्मातामहश्राद्धं नियमात्पुत्रिकासुतः। उभयोरर्घसंबंधः कुर्या
स उभयोरपीति॥ यमसंहितावचनेन॥ मातामहश्राद्धं पुत्रिकापुत्रस्यैव नियमेन विहितं॥ अतो दौहित्रमा
त्रस्य तत्र नियमेनाधिकारो नास्तीत्यवगम्यते॥ श्राद्धं कर्तव्यमित्येवं विधेर्विधौ विशेषानवगमादुभयेषां
श्राद्धं कर्तव्यमित्यवगम्यते। सूत्रकारवचनाच्च पितृभ्यः इत्यादि मातामहानामप्येवं तंत्रं वा वैश्वदेवि
कमिति॥ मातामहवैश्वदेविकस्य तंत्रतोपदेशात्॥ तद्देवं षड्दैवत्यं मुख्यं पार्वणमिति सिद्धं॥ यच्च पार्वणेन
विधिना क्रियमाणमष्टकासंक्रांतिग्रहणादिसाधारणकालविहितं नित्यं नैमित्तिकं काम्यं वा अह
न्यहनि यच्छ्राद्धं तन्नित्यमित्येवं लक्षणिकं प्रतिदिनमनुष्ठीयमानं च नित्यं॥ तदपि षड्दैवत्यमेव॥ पा
र्वणेतिकर्तव्यतातिदेशात्॥ धौम्यवचनाच्च॥ पितरो यत्र पूज्यंते तत्र मातामहा अपि॥ अविशेषेण
कर्तव्यं विशेषान्नरकं व्रजेदिति॥ पित्रादीनां त्रयाणां मातामहादीनां त्रयाणामित्येवममावास्या
श्राद्धे पिंडान्दद्यादिति॥ कात्यायनोप्याह॥ कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशं॥ प्रत्यादि

संपरू

कंचशेषेषु पिंडास्युः षडितिरिति॥ कर्षूसमन्वितं सपिंडीकरणं॥ अनेनार्घ्यात्कर्षूसमन्विताद्विषु मातामह
श्राद्धं न विद्यत इति चोक्तं भवति॥ देवलादिस्मृतिषु॥ एकेनापि हि विप्रेण षट्पिंडं श्राद्धमाचरेत्॥ षडर्घ्यान्दा
पयेत्तत्र षड्भ्यो दद्यात्तथाशनं॥ पितामुखे कृते द्विजवरे मुख्ये भुंक्ते पितामहः॥ प्रपितामहस्तृप्तात्कुस्कंधे कंठे माता
महस्मृतः॥ प्रमातामहस्तु हृदये दृष्टे नाभौ संस्थितः॥ एवमप्याचरेच्छ्राद्धं षड्दैवत्यं महामुने॥ विनाहि
कारयेद्यस्तु पितृहा स प्रजायते॥ मत्स्यपुराणे॥ पिंडान्वाहार्यकं योगे॥ प्राचीनावीतिना कार्यमतः स
र्वविजानता॥ षड्भ्यस्तस्माद्धविःशेषात्पिंडान्कृत्वा तत्र च॥ पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो
मनुष्यः॥ श्राद्धं कृतं तेन समासहस्रं रहस्यमेतत्पितरो वदंति॥ या सा प्रोक्ता तृतीया माघे सा नवमीत्यादि सं
बंधः॥ तद्विष्णुपुराणे॥ वैशाखस्य पक्षे तृतीया या समाप्ता कृतयुगे न तु॥ नवमी कार्तिके या तु त्रेतायुगस
माप्तु सा॥ त्रयोदशी न नभस्ये तु द्वापरे सा समापिता॥ माघे पंचदशी राजन्कलिकाले समास्मृता
॥ एताश्चतस्रो राजेंद्र युगानां प्रभवाः शुभाः॥ युगाद्यस्तु कथ्यंते तेनैताः सर्वसूरिभिः॥ उपवासस्त

९

तोयदानं श्राद्धं होमो जपस्तथा॥ यद्दत्तं क्रियते किंचित्सर्वं कोटिगुणं भवेत्॥ सत्ययुगेन समेति समयेपि त्रेतायुगेऽ
त्यहं क्रियमाणेन कर्मणा यावत्पुण्यं भवति तावदस्यामेकस्यामेव तिथौ भवतीत्यर्थः॥ कोटिशश्चात्र बहुत्वातिश
यपरः॥ देवलः॥ तृतीया रोहिणीयुता॥ त्रयोदशी मघायुता प्रतिडा शस्ता॥ ब्रह्मपुराणे॥ वैशाखस्य तृतीया
यां नवम्यां कार्त्तिकस्य तु॥ श्राद्धं कार्यं तु युक्तायां संक्रांतिविधिना नरैः॥ त्रयोदश्यां नभस्ये च माघे चेंदुक्षये
ऽहनि॥ श्राद्धं कार्यं पायसेन दक्षिणायन वच्च तत्॥ पिंडनिर्वपणं विनेत्यर्थः॥ इति युगादयः॥ अथ युगांताः॥ ब्रह्मपुराणे॥
सूर्यस्य सिंहसंक्रांत्यामंतं कृतयुगस्य तु॥ अथ वृश्चिकसंक्रांत्यामंतस्त्रेतायुगस्य तु॥ इयस्तु वृषसंक्रांत्यां द्वापरांतस्त्व
संज्ञया॥ तथा कुंभसंक्रांत्यामंतः कलियुगस्य तु॥ युगादिषु युगांतेषु श्राद्धमक्षयमुच्यते॥ इति युगांताः॥ अथ मन्
न्वंतरादयः॥ तत्र मात्स्ये ब्रह्मपुराणयोः॥ आश्वयुक्शुक्लनवमी द्वादशी कार्त्तिकस्य च॥ चैत्रस्य तु तृतीयायां तथा
भाद्रपदस्य तु॥ फाल्गुनस्य त्वमावास्या पौषस्यैकादशी तथा॥ श्रावणस्याष्टमी कृष्णा तथाषाढस्य पूर्णिमा॥ आ
षाढस्य तु दशमी माघमासस्य सप्तमी॥ कार्त्तिकी फाल्गुनी चैत्री ज्येष्ठपंचदशी तथा॥ मन्वंतरादयश्चैता द
त्तस्याक्षयकारकाः॥ नागरखंडे॥ माघशुक्लतृतीयापि मन्वंतरादिरुच्यते॥ मन्वादिरपि ते वंचिताः शृणु भनरा

धिपा। पितॄणां वल्लभा नित्यं सर्वपापक्षयावहा॥ यासु तोयमपि स्नात्वा यां प्रदत्तं तिलमिश्रितं॥ पितृभ्यो ऽक्षयतां याति
श्राद्धापूतेन चेतसा॥ आश्वयुक् शुक्लनवमी द्वादशी कार्त्तिकस्य च। तृतीया चैव माघस्य तथा भाद्रपदस्य च॥ अमा
वास्या तपस्य पौषस्यैकादशी तथा॥ तथाषाढस्य दशमी माघमासस्य सप्तमी॥ श्रावणस्याष्टमी कृष्णा तथाषाढस्य
पूर्णिमा॥ तथा कार्त्तिकमासस्य तथा वै फाल्गुनस्य च॥ चैत्रस्य ज्येष्ठमासस्य पंचैताः पूर्णिमा स्मृताः॥ मन्वंतरादयः प्रोक्ता
सांहस्रांश्च पातव॥ यासु तोयमपि स्नात्वा तिलदर्भविमिश्रितं॥ पितॄनुद्दिश्य यो दद्यात् स गतिं परमां व्रजेत्॥ इह लोके परे चैव
पितॄणां च प्रसादतः॥ किं पुनर्विविधैरन्नैः सर्वैर्विसुदक्षिणैः॥ मासस्य ब्रह्मपुराणयो॥ यस्यां मन्वंतरस्यादौ रथमाप
दिवाकरः॥ माघमासस्य सप्तम्यां सा तु स्यात् रथसप्तमी॥ पानीयमप्यत्र तिलैर्विमिश्रं दद्यात् पितृभ्यः प्रयतो मनुष्यः॥
श्राद्धं कृतं तेन समाः सहस्रं रहस्यमेतत् पितरो वदंति॥ इति मन्वंतरादयः॥ अथ मन्वादिनामाभिधानं॥ स्वायंभुव। स्वा
रोचिष। उत्तम। तामस। रैवत। चाक्षुष। वैवस्वत। महाद्रेता। सावर्णि। ब्रह्मसावर्णि। धर्मसावर्णि। रुद्रसावर्णि
देवसावर्णि। इंद्रसावर्णि॥ अथ कल्पादयः॥ तत्र नागरखंडे॥ अथ कल्पादयो राजन् कथ्यंते तिथयः शुभाः॥ यासु श्राद्धे
कृते तृप्तिः पितॄणामक्षया भवेत्॥ चैत्रशुक्लप्रतिपदि श्वेतः कल्पः पुराभवत्॥ तस्य शुक्लत्रयोदश्यां सुदानः समजायत॥

नो

कल्पस्तु नारसिंहाख्यः कृष्णायां प्रतिपद्यभूत्॥ अथ कृष्णत्रयोदश्यां गौरीकल्पोप्यकल्पत॥ वैशाखस्य द्वितीयायां शुक्ला-
यां श्वेतलोहितः॥ चतुर्दश्यां तु शुक्लायां प्रवृत्तो गारुडाभिधः॥ समानस्तु द्वितीयायां कृष्णायामुपपद्यते॥ माहेश्वरस्य चतु-
र्दश्यां कृष्णपक्षे समागमत्॥ ज्येष्ठशुक्लतृतीयायां वामदेवस्य संभवः॥ पौर्णमास्यां तु तस्यैव कौर्मः प्रवर्त्तनपा॥
कृष्णपक्षे तृतीयायां माग्नेयः समगच्छत॥ पितृपक्षे अमावास्यां तस्यैवाश्रित्यपद्यत॥ शुचौ शुक्लचतुर्थ्यां तु कल्पो मा-
पांतरोऽभवत्॥ तस्यां तस्यैव कृष्णायां सोमकल्पः समापतत्॥ श्रावणे शुक्लपंचम्यां रौरवः समवर्त्तत॥ तस्यैव
कृष्णपंचम्यां मानवः समपद्यत॥ षष्ठी प्रोष्ठपदे शुक्लां प्राप्य प्राणाभिधानवत्॥ सितेतरायां षष्ठ्यां तु तस्य तत्पु-
रुषाह्वयः॥ बृहत्कल्पस्तु सप्तम्यां शुक्लायामाश्विनस्य तु॥ कृष्णायामपि वैकुंठः प्रविवेश विशांपते॥ कार्त्तिकस्य
सिताष्टम्यां कल्पः कंदर्पसंज्ञकः॥ असितायां पुनर्जज्ञे लक्ष्मीकल्पस्य कल्पना॥ मार्गशुक्ल नवम्यां तु कल्पः स-
द्योऽभ्यपद्यत॥ असितायां तु सावित्री कल्पप्रारंभमभ्यगात्॥ पुष्ये दशम्यां शुक्लायां ईशानः प्रादुरासह॥ असि-
तायामघोरस्य कल्पस्योपक्रमोऽभवेत्॥ एकादश्यां तु शुक्लायां माघे शानः प्रजज्ञिवान्॥ तस्यामेव तु मिश्रायां
वाराहः प्रापभूपते॥ सारस्वतस्तु द्वादश्यां शुक्लायां फाल्गुनस्य च॥ कृष्णायामथ वैराजो विरराज महामते॥

इतित्रिंशद्दमीकल्पास्तिथयःपरमेष्ठिनः॥ आरंभतिथयस्तेषामुक्ताःपुण्यतमामया॥ तासुश्राद्धे तु तत्पुण्यमाक
ल्पायकल्पते॥ मत्स्यपुराणे॥ वैशाखस्यतृतीयायातृतीयाफाल्गुनस्यच॥ पंचमीचैत्रमासस्यतस्यैवांत्यातथाप
रा॥ शुक्लात्रयोदशीमाघेकार्त्तिकस्यचसप्तमी॥ नवमीमार्गशीर्षस्यसप्तैताःसंस्मराम्यहं॥ कल्पानामादयोह्येता
दत्तस्याक्षयकारकाः॥ अंत्यामावास्यावैशाखतृतीयाफाल्गुनतृतीयाचैत्रपंचमीचैत्रमावास्येतिशुक्लामाघत्र
योदशीकार्त्तिकसप्तमीमार्गशीर्षनवमीएताःशुक्लाः॥ इतिकल्पादयः॥ अथद्रव्यब्राह्मणसंपत्त्योपस्थितःकालः
तत्रहारीतः॥ तीर्थद्रव्योपपत्तौचनकालमवधारयेत्॥ पात्रंचब्राह्मणंप्राप्यसद्यःश्राद्धंविधीयते॥ तीर्थंगयादिद्रव्यं
मुत्पन्नादिवक्ष्यमाणं॥ पात्रंश्रोत्रियत्वादिविशेषणविशिष्टंचब्राह्मणंप्राप्यनकालांतरंप्रतीक्षेत॥ किंतुतस्मि
न्नेवकालेश्राद्धंकुर्यात्॥ अत्रसद्यइतिवचनादावश्यकत्वंप्रतीयते॥ मार्कंडेयपुराणे॥ विशिष्टब्राह्मणप्राप्तौसूर्ये
दुग्रहणेऽयने॥ श्राद्धार्हद्रव्यसंपत्तौतथादुःस्वप्नदर्शने॥ जन्मर्क्षेग्रहपीडासुश्राद्धंकुर्वीतचेच्छयेति॥ अत्रे
च्छापदंयथाविधीत्यनेननविरुध्यते॥ तथा॥ व्याख्यातमेवग्रहणाकरणं॥ ब्रह्मपुराणे॥ यदाचश्रोत्रियो
भ्येतिगेहंवेदविदग्निचित्॥ तेनैकेनापिकर्त्तव्यंश्राद्धंविष्णुंवतत्क्षणं॥ श्राद्धीयद्रव्यसंप्राप्तिर्यदास्यात्साधु

याज्ञवल्क्यः अमावास्याष्टकावृद्धिः कृष्णपक्षोऽयनद्वयं । द्रव्यंब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः ॥ व्यतीपातोगजच्छायाग्रहणंचंद्र
सूर्ययोः । श्राद्धंप्रतिरुचिश्चैवश्राद्धकालाःप्रकीर्तिताः ॥ २
संमंता । पार्वणेनविधानेनश्राद्धंकार्यंद्विजोत्तमैः ॥ विष्णुपुराणे ॥ द्रव्यब्राह्मणसंपत्स्वुपलब्धितेकालेकाम्यमपिश्राद्धं
युक्तं । तथा । तत्रकाम्यात्कालाच्छ्रुधेयस्यानंतरंभवतिवचनं ॥ श्राद्धार्हमागतंद्रव्यंविशिष्टमथवाद्विजं । श्राद्धंकु
र्वीतविज्ञायव्यतीपातेऽयनेतथा ॥ इतिद्रव्यब्राह्मणसंपत्स्वुपलब्धितकालनिरूपणं ॥ अथ [illegible]कालः ॥ मत्स्यपु
राणे ॥ अतःपरंप्रवक्ष्यामिविष्णुनायदुदीरितं ॥ श्राद्धंसाधारणंनामभुक्तिमुक्तिफलप्रदं ॥ अयनेविषुवेयुग्मेसामा
न्येचार्कसंक्रमे ॥ अमावास्याष्टकायांचकृष्णपक्षेविशेषतः ॥ आर्द्रामघारोहिणीषुद्रव्यब्राह्मणसंगमे ॥ गजच्छाया
व्यतीपातेविष्टिवैधृतवासरे ॥ तथा ॥ वैशाख्यामुपरागेषुतथोत्सवमहालये ॥ ब्रह्मपुराणे ॥ श्राद्धंदेयमनुशंतीहमासि
मास्युडुपक्षये ॥ पौर्णमास्येपिचश्राद्धंकर्तव्यंऋक्षगोचरे ॥ नित्यंश्राद्धंविधेयंचमनुष्यैरिहगीयते ॥ वृद्धिश्राद्धंचकर्त्त
व्यंजातकर्मादिकेबुधैः ॥ कन्यागतेसवितरिदिनानिदशपंचच ॥ पार्वणेनहविधिनाश्राद्धंतत्रविधीयते ॥ आहजा
तूकर्ण्यः ॥ ग्रहोपरागेचसुतेचजातेपित्र्येमघायामयनद्वयेच ॥ नित्यंचशंखेचतथैवपक्षेदत्तंभवेन्निष्कसहस्र
तुल्यं ॥ अत्रयन्नित्यंदत्तमित्यत्रयंमन्यमानाग्रहोपरागादिषुश्राद्धादेर्नित्यतांब्रुवते ॥ अथवानित्यमहरहर्योवर्जी
तंपित्र्येमघायामिति ॥ नाऽपदपरपक्षस्थितासुमघास्वित्यर्थः ॥ शंखपक्षयोर्लक्षणमपिसएवाह ॥ शंखश्राद्ध

रमावास्यां द्वीपे सोमं द्विजोत्तम ॥ अष्टकासु नवे सस्ये तं तद्दत्तं तथाक्षयमिति ॥ शंखस्त्वाह ॥ यदा विष्टिर्व्यतीपातो भानुवार
स्तथैव च ॥ पद्मकं नाम तत्प्रोक्तमयनाच्च चतुर्गुणम् ॥ विष्णुधर्मोत्तरे ॥ आश्विनस्यापरं पक्षं प्रथमं कार्तिकस्य च ॥
यस्तु श्राद्धं सदा कुर्यात्सोऽश्वमेधफलं लभेत् ॥ निद्रां त्यजति सर्वात्मा तस्मिन्काले जनार्दनः ॥ तत्र श्राद्धमथा
न्नं तेनात्र कार्या विचारणा ॥ तथा ॥ आकल्पं च तथा श्राद्धं विज्ञेयं राहुदर्शने ॥ व्रीहिपाके च कर्तव्यं यवपाके च पार्थि
व ॥ नतावद्धो महाराजन् विना श्राद्धं कथंचन ॥ शातातपः ॥ नवोदके नवान्ने च गृहप्रच्छादने तथा ॥ पितरः स्पृ
हयंत्यन्नं वर्षासु च मघासु च ॥ तस्माद्दद्यात्सदोद्युक्तो विद्वत्सु ब्राह्मणेषु च ॥ आह पितामहः ॥ अमावास्या व्यती
पातपौर्णमास्यष्टकासु च ॥ विद्वान् श्राद्धमकुर्वाणो नरकं प्रतिपद्यते ॥ इति प्रकीर्णकालाः ॥ अथ काम्य
श्राद्धकालाः ॥ तत्र तावत्तिथयः आह कात्यायनः ॥ अथ काम्यानि तं गं ति स्त्रियो प्रतिरूपा इत्यादि ममावास्या
यां सर्वमिति तेन ॥ मार्कण्डेयपुराणे ॥ कन्यागते सवितरि दिनानि दश पंच च ॥ पार्वणेनह विधिना श्राद्धं तत्र
१ प्रतिपत् विधीयते । धनलाभ । द्विपद । वराथि । शत्रुनाशनी । श्रियं । नर पूजा । गणाधिपत्यं । बुद्धिमुत्तमां । श्रियं । पूर्णकामा वे
दांत । जयलाभ पितृरजक । आदि कामः । शस्त्रेणहताः । सर्वान्कामान् ॥ विष्णुधर्मोत्तरे । कन्यागते सवितरि सप्तपके

१०

तत्र च प्रतिपदम्प्रभृति प्रतिपदं तत्पर्यन्तं षोडश श्राद्धानि कुर्यात्। पंचम्याः प्रभृति पर्यन्तमित्यपरे। तत्पक्षमध्ये कस्यामपि तिथौ सविता कन्यागतश्चेत्तदारितः
प्रभृति सर्वोऽपि पक्षः श्रेष्ठतमः॥ महालये त्वशक्तेनापि अवश्यमेकस्मिन्नपि दिने श्राद्धे नान्दिश्राद्धं कार्यमेव। सूतकादिविघ्ने संजाते यदि कदाचित्तत्रेन दत्तं तदा कन्या
राशौ यावत्सूर्यस्तिष्ठेत्तावदन्यस्मिन्नपि पक्षे देयं॥ तत्रापि न दत्तं चेत्तदा दीपावल्यां पंचदश्याम् अवश्यं देयमेव॥ अकरणेऽत्यवायस्मरणात्। महालये चतुर्दशीं विना

शमीतुया॥ सा च पापहरा पुण्या शिवस्यानंदवर्द्धनी॥ स्नानं दानं जपः होमः पितृदेवार्चनं॥ सर्वं प्रीतिकरं स्याद्धि दत्तं
तस्यां त्रिलोचन॥ विशेषतः कृतश्राद्धं होमश्च विधिवन्मुने॥ तस्माच्छ्राद्धं प्रयत्नेन तस्यां कुर्याद्द्विजोत्तमाः॥ एकनक्तं तु
पंचम्यां षष्ठ्यां नक्तं विदुर्बुधाः॥ उपवासस्तु सप्तम्यां अष्टम्यां पूजयेच्छिवं॥ पूजयित्वा शिवं तत्रापि स्वश्राद्धं तु
कल्पयेत्॥ स त्वा तु विधिवच्छ्राद्धं भुंजीत पितृसेवितं॥ यस्तु तस्यां कुरुते श्राद्धं पूजयित्वा त्रिलोचनं॥ तस्य वर्षाणि द्वाद
शतः पितरो दद्युः पंचवर्षं [illegible] काम्यास्तिथयः॥ अथ नक्षत्राणि॥ तत्र मनुः॥ युक्तं कुर्वन् दिनर्क्षेषु सर्वान्कामान्समश्नु
ते॥ अयुक्तं च पितॄन्सर्वान्प्रजां प्राप्नोति पुष्कलां॥ युक्तं सामसु॥ अयुक्तं विषमेषु॥ यमः॥ युक्तं कुर्वन् दिनार्क्षेषु सर्वा
न्कामान्समश्नुते॥ गजच्छायां पितॄन्सर्वान्प्रजाः प्राप्नोति पुष्कलाः॥ विष्णुमार्कंडेयपुराणे॥ कृत्तिकासु पितॄनर्च्य स्व
र्गमाप्नोति मानवः॥ अपत्यकामो रोहिण्यां सौम्ये तेजस्वितां लभेत्॥ शौर्यमार्द्रास्वथाप्नोति क्षेत्रादि च पुनर्वसौ॥ पु
ष्टिं पुष्ये सदाप्यर्च्य आश्लेषासु वरान्सुतान्॥ मघासु स्वजने श्रेष्ठ्यं सौभाग्यं फाल्गुनीषु च॥ प्रदानशीलो भवति सा
पत्यश्चोत्तरासु वै॥ प्रयाति श्रेष्ठतां सुहस्ते श्राद्धप्रदो नरः॥ रूपयुक्तस्तु चित्रासु तथापत्यान्यवाप्नुयात्॥ वाणिज्यला
भं स्वात्यां तु विशाखासु पुत्रकामदा॥ कुर्वतां चानुराधासु दद्याच्चक्रप्रवर्तनं॥ आधिपत्यं च ज्येष्ठासु मूले चा

सर्वेषां पितॄणां श्राद्धं कार्यं॥५

५ इति

रोग्यमुत्तमं ॥ आषाढ्यां सुयशः प्राप्तिं मूलर्क्षे सु विशोकतां ॥ श्रवणे शुभां देशाद्धात्रे धनिष्ठासु धनं म
हत् ॥ वेदविद्वत्वमभिजिति भिषक्सिद्धिं च वारुणे ॥ अजाविकं प्रोष्ठपदे विंदेद्गां याम्यथोत्तरे ॥ रेवतीषु
तथा कुप्यमश्विनीषु तुरंगमान् ॥ श्राद्धं कुर्वंस्तथाप्नोति नरस्त्वायुरुत्तमं ॥ तस्मात्काम्यानि कुर्वीत
ऋक्षेष्वेतेषु तत्त्ववित् ॥ वाराः ॥ विष्णुः ॥ सततमादित्येह्नि श्राद्धं कुर्वन्नारोग्यमाप्नोति सौभाग्यं चान्द्रे स
मरविजयं कुजे सर्वान्कामान्बुधे ॥ विद्यामभीष्टां जीवे धनं तु शुक्रे जीवितं शनैश्चरे ॥ कुजेह्नि मंगलादि
ने जीवे बृहस्पतिदिने ॥ ब्रह्मोवाच ॥ येत्यादित्यदिने प्राप्ते श्राद्धं कुर्वंति मानवाः ॥ सप्त जन्मानि ते जाताः संभ
वंत्य विरोधिनः ॥ पंचतारं तु नवैद्यत्रं न दारं गोष्ठ बंधुजं ॥ वारे तु देवदेवस्य सवाराः पुत्रदः स्मृतः ॥ उप
वासो न वै तत्र श्राद्धं कार्यं तथा न वै ॥ आशनं चापि पिंडस्य मध्यमस्य प्रकीर्तितं ॥ सोपवासस्तु वै
न तत्राह जयेच्चैव गोपतिं ॥ धूपमाल्योपहारैः सुदिव्यगंधैः समन्वितैः ॥ एवं सज्यादिवस्यं तौ हि मादिये
दृष्टव्यः [illegible] पपुराणे ॥ भुक्तांगारकयुक्ता या चतुर्थी जायते तदा ॥ श्रद्धया श्राद्धकृद्विप्रो नजेतोजा
यते मृतः ॥ स्कंदपुराणे ॥ अमायां यदि सोमः स्यात् सप्तम्यां वै दिवाकरः ॥ चतुर्दश्यां चतुर्थ्यां वा वारस्यानम

अर्घ्यादिकं ॥ २

११

विस्तर

अथ कामाः

गस्त कुले द्य॥ नदद्याच्छ्राद्धं प्रवर्त्तयन्‌ पितॄं स्तांस्तृप्तिमिच्छता॥ षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च॥ नंदंति पितरः स्वर्गे विमानवरमास्थिताः॥ तावंतमेव कालं हि श्राद्धकर्त्तुस्तथा फलं॥ इति विष्णुधर्मोत्तरे॥ विष्णुपुराणे॥ मासि मास्यसिते पक्षे पंचदश्यां नरेश्वर॥ तथाष्टकासु कुर्वीत काम्यान्कालान्छृणुष्व मे॥ श्राद्धार्हमागतं द्रव्यं विशिष्टमथवा द्विजं॥ श्राद्धं कुर्वीत विज्ञाय व्यतीपातेऽयने तथा॥ विषुवे चापि संप्राप्ते ग्रहणे शशिसूर्ययोः॥ समस्तेष्वेव भूपाल राशिष्वर्के च गच्छति॥ नक्षत्रग्रहपीडासु दुष्टस्वप्नावलोकने॥ इच्छाश्राद्धानि कुर्वीत नवसस्यागमे तथा॥ जन्मर्क्षे चैव कुर्यात्॥ विष्णुरप्याह॥ संक्रांति विषुवे चैव विशेषेणायनद्वये॥ व्यतीपातेऽथ जन्मर्क्षे चंद्रसूर्यग्रहे तथा॥ इत्येतान् श्राद्धकालांस्तु काम्यानाह प्रजापतिः॥ श्राद्धमेतेषु यद्दत्तं तदानंत्याय कल्पते॥ ब्रह्मवैवर्त्ते॥ अमावास्याद्यपर्वे न श्राद्धं कुर्याच्छुचिः सदा॥ सर्वान्कामानवाप्नोति स्वर्गे चानंत्यमश्नुते॥ दत्तं यद्यादमावास्यां सोमस्याप्यायनं महत्॥ एवमाप्यायितः सोमस्त्रींल्लोकान्धारयिष्यति॥ ब्रह्मपुराणे॥ नांदीमुखानां प्रत्यब्दं कन्याराशिगते रवौ॥ पौर्णमास्यां तु कर्त्तव्यं वराहवचनं यथा॥ नागपुराणे॥ अथ कालं जगदुर्यो हि श्राद्धकर्मणि प्रदिष्टं॥ काम्यं नैमित्तिकं काम्यं श्राद्धं

अथ नांदीमुखश्राद्धे त्रिपुरुषाद्‌

अत: सांवत्सरिके मृतोऽब्दे शुद्धेनोक्ता मरणकालिन्येव तिथिर्वेदितव्या॥ साग्निकस्योद्दहनादि कालः॥ ५

कर्मविधायि वित्ति:॥ पुत्रस्याधनमूलं नंस्कारस्य कारिस्त्रिएव च॥ इति काममात्राक्रीर्णकालः॥ अथेदानीं सांवत्सरि
कश्राद्धकालः॥ तत्र तावत्कृत्याह निर्णयः॥ ब्रह्मपुराणे॥ प्रतिसंवत्सरं कार्यं मातापित्रोर्मृतोहनि॥ पितृव्य
स्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्य चैवहि॥ मात्रादीनां श्राद्धं कार्यमित्यनेनार्थात्पुत्रादीनां कर्त्तव्यमुक्तं॥ एतच्चा
धिकारिमात्रोपलक्षणार्थं भ्रातुरित्यत्रापुत्रस्येत्यनुषंजनीयं॥ ज्येष्ठस्येत्यनेन कनिष्ठस्य भ्रातुर्नावश्यकं
सांवत्सरिकमिति दर्शितं॥ तथा च नपुत्रस्यापि तादृशान्भ्रातुजस्य तथाग्रज इति॥ नियताधिकारनिराकर
णात्॥ स्नेहादिनात्वनियताधिकारेणाऽपुत्रकनिष्ठस्यापि सांवत्सरिकं कर्त्तव्यमेव॥ तथा चोक्तं॥ अ
पुत्रस्ते हेन कुर्यात्सपिंडीकरणं विनेति॥ व्यासः॥ मासपक्षतिथिस्पृष्टे यो यस्मिन्म्रियतेहनि॥ प्रत्यब्दं तु तथा १२
भूतं क्षयाहं तस्य तं विदुरिति॥ तथाभूतमित्यपलक्षणात्रयोपेतं॥ मासपक्षतिथौ॥ अधिमासे विप
त्तिः स्यात्सौरमानं समाश्रयेत्॥ स एव दिवसस्तस्य श्राद्धपिंडोदकादिषु॥ ~~सांवत्सरिकपार्वणमिति~~
~~कायपरंहन्न॥ एकोद्दिष्टं तु मध्याह्ने यथाकृत्साचारः~~॥ मनुः॥ पूर्वाह्णे दैवकं श्राद्धं मपराह्णे तु पार्वणं॥
एकोद्दिष्टं मध्याह्ने स्यात्तदृद्धिनिमित्तकं॥ आमश्राद्धं पूर्वाह्णे॥ अरुणाउवाच॥ नजानातिदिनंप

सांवत्सरिकद्विविधं॥ पार्वणं एकोद्दिष्टं वा २

स्य मासं नाप्य मराधिप ॥ मृतयोस्तु महाभाग पित्रोस्तु स कथं नरः ॥ आदित्य उवाच ॥ मृताहं यो न जा-
नाति मानवो विनतात्मज ॥ तेन कार्यं ममावास्यां श्राद्धं सांवत्सरं नृप ॥ यस्य प्रोषितस्याज्ञोऽपि तस्य चाप्मतस्य ति-
थिर्न ज्ञायते मासस्तु ज्ञायते तस्य तन्मासामावास्यायां सांवत्सरिकं कार्यमिति समर्थः ॥ तथाह बृहस्पतिः ॥ न ज्ञायते
मृताहश्चेत्प्रमीते प्रोषिते सति ॥ मासश्चेत्प्रतिविज्ञातस्तद्दर्शः स्यान्मृताहनि ॥ ज्ञोऽपि तद्ज्ञानं कारणायलक्षतां ॥ तद्वी-
तन्मासामावास्यायां मृताहनि तत्र कर्तव्यमिति शेषः ॥ तद्विष्णौ तरे ॥ अवासमन्तरेणापि स्यानां तौ विस्मृतौ यदा
॥ तदानीमपि तौ ग्राह्यो पूर्ववत्तु मृताहिके ॥ अस्मिन्नेव विषये एकादश्यां श्राद्धमाह मरीचिः ॥ श्राद्धविघ्ने समुत्पन्ने
विज्ञाते मृतेहनि ॥ एकादश्यां च कर्तव्यं कृष्णपक्षे विशेषतः ॥ अत्र विशेषत इति कृष्णपक्षस्य प्रशस्ततरत्वाभिधाने
न शुक्लपक्षेऽपि विज्ञायत इति गम्यते ॥ ततश्च शुक्लकृष्णैकादश्योर्विकल्पे प्राप्ते व्यवस्था ॥ मासे पक्षे च विज्ञा-
ते तिथिमात्रस्य परिज्ञाने तस्य मासस्य तत्पक्षस्थितायामेकादश्यां श्राद्धं कार्यं विज्ञायमानपक्षपरित्यागकारण-
ताभावात् ॥ पक्षस्याप्यपरिज्ञाने कृष्णैकादश्यां अज्ञाने तु शुक्लैकादश्यामपीति ॥ तद्विष्णुरहस्ये ॥ दिनमेव वि-
जानाति मासं नैव तु यो नरः ॥ मार्गशीर्षे पौषे वा तदा माघे वा यः समाचरेत् ॥ तोज्ञकस्य विशेषेण यो मां तु जपते स ।

॥ यस्य तु मृताहः परिज्ञायते मासस्त्वज्ञायते तस्य मार्गशीर्षे वाद्रपदे माघे वा तस्मिन्नहनि श्राद्धं कार्यं ॥ तदाह बृ-
हस्पतिः ॥ यदा मासो न विज्ञातो विज्ञातं दिनमेव तु ॥ तदा मार्गशिरे मासि माघे वा तद्दिनं भवेत् ॥ यदा तु प्रोषित-
मृतस्य दिनमासावुभावप्यविज्ञातौ स्यातां ॥ तदा तत्प्रस्थानकालिकयोर्दिनमासयोस्तमावस्यरिकं कार्यं
तदाह बृहस्पतिः ॥ दिनमासौ न विज्ञातौ मरणस्य यदा पुनः ॥ प्रस्थानदिनमासौ तु ग्राह्यौ पूर्वोक्तया दिशा ॥ दि-
नशब्देन सर्वत्र तिथिरवगंतव्या ॥ पूर्वोक्तदिशेत्यस्यायमर्थः ॥ प्रस्थानतिथ्यज्ञाने तन्मासज्ञाने च तन्मासव-
र्तिन्याममावास्यायां सांवत्सरिकं ॥ प्रस्थानतिथिज्ञाने मासाज्ञाने च मार्गशीर्षे माघे वा तस्यामेव तिथौ कुर्यात् ॥ प्रस्था-
नतिथिमासयोरुभयोरप्यज्ञाने तु तन्मरणश्रवणकालिकयोस्तिथिमासयोः कुर्यात् ॥ तदाह प्रचेताः ॥ अपरि-
ज्ञाते मृते मावास्यायां श्रवणादिवसे वा ॥ श्रवणादिवसे मरणवार्ताकर्णनतिथौ ॥ तद्विष्णोत्तरेपि ॥ मृतवार्ता-
श्रुतौ ग्राह्यौ तौ पूर्वोक्तक्रमेण तु ॥ श्रवणतिथिविस्मरणे च मार्गशीर्षे माघे वा स्मरणे च तन्मासवर्तिन्या-
ममावास्यायां सांवत्सरिकं ॥ श्रवणतिथिस्मरणे मासविस्मरणे च मार्गशीर्षे माघे वा तस्यामेव तिथौ कार्यं
श्रवणतिथिमासयोरुभयोरपि विस्मरणे मार्गशिरस्य माघस्य वा अमावास्यायां कार्यं तदुक्तं प्रभासखंडे ॥

मृतस्याहं न जानाति मासात्पितृ कथंचन ॥ तेन कार्यममावास्यां श्राद्धं माघेथ मार्गके ॥ कथंचन मरणाज्ञस्य श्र
वणाद्रूपेणाकेनाप्यपलक्षणे नेसर्पधः ॥ त्रविंष्यो नरे ॥ प्रवासमंतरेणापिस्या तां तौ विस्मृतौ तदा ॥ तदानीमपि
तौ या होपूर्ववन्मृतकालिके यस्य तु जोपि तस्य मरणवार्त्ताजीवनवार्त्तापि नाकर्ण्यते ॥ पंचदशवर्षपर्यंतं
मार्गमनं नास्ति तस्य तदूर्ध्वं पालाशीभिः समिद्भिः कुशैर्वा शरीरं प्रकृतिं कृत्वा यथाविधि दाहसंस्कारं निर्वर्त्य त
दानीं न तत्पक्षमासतिथिस्पृष्टेहनि सांवत्सरिकं कर्त्तव्यमित्याह जातूकर्ण्यः ॥ पितरि जीविते यस्य न वार्त्ता नि
न चागतिः ॥ ऊर्द्ध्वं पंचदशाद्वर्षात्कृत्वा तत्प्रतिरूपकं ॥ कुर्यात्तस्य तु संस्कारं यथोक्तविधिना नरः ॥ तदानीमेव सर्व
त्राशौचकर्मादि संचरेत् ॥ इति क्षयाह श्राद्धकालाः ॥ त्रिकांडमंडनः ॥ मुख्यकाले यदावश्यं कर्म कर्तुं न शक्यते ॥
गौणकालेपि कर्त्तव्यं गौणोप्यत्रेदृशो भवेत् ॥ इतीदृशो मुख्यकालसदृशः ॥ तथा ॥ दिवोदितानि कर्माणि प्रमा
दादकृतानि [illegible] । यामिन्याः प्रहरं यावत्तावत्सर्वाणि कारयेत् ॥ ननु यदि मुख्यकालातिक्रमे गौणकाल
ग्रहणमविरुद्धं तर्हि दर्शपौर्णमासपार्वणश्राद्धादीनाममावास्यादिविहितकालातिक्रमे पंचम्यादिकर्तव्यसंप्र
सज्येत ॥ अकाले यदि वाकाले तीर्थश्राद्धं सदा नरैः ॥ इत्यप्रसंगः ॥ देयं पितॄणां श्राद्धं तु आशौचं जाय

तेषदा। आशौचे तु व्यतिक्रांते तेभ्यः श्राद्धं विधीयते॥ एतच्छ्राद्धाधिकारिणां॥ त्रिवचनं॥ तद्दशश्चतुर्दुष्येत
के न चिरसूतकादिना॥ सूतकानंतरं कुर्यात्तु नस्तत्रैवचेति॥ व्यासवचनं॥ श्राद्धविघ्ने समुत्पन्ने
अंतरामृतसूतके॥ अमावास्यां प्रकुर्वीत तस्मादावेके मनीषिणा इति॥ अंतरामृतसूतके श्राद्धप्रयोगमध्ये
पाकोपक्रमात्प्राक् मृतके सूतके वा जाते अमावास्यां अमावास्यायां शुद्ध्यानंतरं॥ एतस्यां वत्सरिक
श्राद्धविषयं॥ अमावास्यायहणं शुक्लैकादश्यां कृष्णैकादश्यांश्चोपलक्षणं॥ अत एव मरीचिः॥ श्राद्धवि
घ्ने समुत्पन्ने अविज्ञाते मृतेऽहनि॥ एकादश्यां तु कर्तव्यं कृष्णपक्षे विशेषतः॥ कृष्णपक्षे या एकादशी त
स्यां विशेषतः कर्तव्यमित्यन्वयः पितृकार्ये च्युतः कृष्णपक्षस्यैव ग्राह्यत्वात्॥ कृष्णैकादशीतोऽमावास्या
याः पितृकार्यत्वं प्रदंडापूर्वधायासिद्धं बाह्यं॥ यत्तु षड्विंशन्मते॥ मासिकाब्दे तु संप्राप्ते अंतरामृतसूत
के॥ वदंति शुद्धौ तत्कार्यं दर्शे वापि विचक्षणाः॥ पिंडश्राद्धं प्रदातव्यं विच्छित्तिं नैव कारयेदिति॥ यच्छ्रुत्याख्ये
यात्प्राद्धं ब्राह्मणाः चशब्देनाग्नौकरणमपि कर्तव्यमिति॥ समुज्झितेति श्राद्धशब्देनात्र ब्राह्मणा
तर्पणमात्रमुपचारादुच्यते॥ ननु मुख्यार्थतया॥ अग्नौकरणब्राह्मणतर्पणसपिंडदानात्म

२८

अहोरात्रा॥ अपत्नीकप्रवासी च यस्य भार्या रजस्वला। सिद्धान्नेन न कुर्वीत आमं तस्य विधीयते॥ अधिकारी तु भार्याद्यपरागतरस्य चान्ता जाऽशौचदर्शनविघ्नरूपविघ्नापगमकाल एव कर्तव्यं॥ ४ किंतु सिद्धान्नेनैव कुर्यादित्यर्थः॥

क कर्मत्रितयस्य मुख्यस्यैव मुख्यार्थत्वात्॥ विच्छित्तिं नैव कारयेदित्यस्यायमर्थः॥ कृत्स्नस्य श्राद्धश्रा-
र्धस्य कर्तुमशक्यत्वेपि तदेकदेशमात्रं वा यथासामर्थ्यं कुर्यात्॥ सर्वथा कर्मविच्छित्तिं नैव कुर्यादिति॥ नि-
गमः॥ आहिताग्नेः पितृयज्ञे न पिंडो एव ब्राह्मणा न पिवा भोजयेदिति॥ ब्रह्मपुराणे॥ गृहीतमधुपर्कस्य य-
जमानस्य चर्त्विजः॥ पश्चाद्दशाहपतिते नाशौचमिति निश्चयः॥ स्नानं त्वन्नप्रथेयावत्पावकस्य न विद्यते
॥ निवृत्तदर्शहोमादौ ब्राह्मणादिषु भोजने॥ निमंत्रितेषु विप्रेषु आरब्धे श्राद्धकर्मणि॥ निमंत्रणाद्धि वि-
प्रस्य स्वाध्यायाद्विरतस्य च॥ देहेपि सूतकप्राप्तिस्तत्र नाशौचं विद्यते क्वचित्॥ अविज्ञाने नाशौचं॥ यदा तु पाका-
त्पूर्वं निमंत्रणं तत्र तु तदा पाकः स्यात्तत्र तत्कर्म समाप्य आशौचाभावः॥ रजोदर्शननिमित्तं सिद्धान्तमाह
डाभासरखंडे॥ संप्राप्ते श्राद्धकाले तु चतुर्थेह्नि स्नाता नारी रजस्वला। देवकर्मणि पित्र्ये च पंचमेहनि शुध्यति॥ स्मृत्य-
न्तरे॥ मृतेऽहनि तु संप्राप्ते यस्य भार्या रजस्वला॥ श्राद्धं तदा न कर्तव्यं कर्तव्यं पंचमेहनि॥ अधिकारिभा-
र्यान्तरसत्त्वे न बाधिकारान्तरपगमानुख्यकाल एव कर्तव्यं॥ इति मुख्यकालातिक्रमे कालः॥ द्विधा विघ्न-
कस्यात्कृतः सर्वो भागः स्वर्वाह्णोऽपराह्ण इति स्पष्टमेवावगम्यते॥ अथ त्रिधा विभक्तस्याह्नस्तृतीयो भागोऽपराह्णः

त्यपरं मतं ॥ तत्र श्रुतिः ॥ पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणां अपराह्णः पितॄणां । तस्मादपराह्णे ददातीति ॥
अत्र पंचदशमुहूर्तात्मकस्य दिवसस्य पंच पंच मुहूर्त्तपरिमिता पूर्वादिनामकास्त्रयो भागान्परिकल्प्य क्रमाद्दैव
व मानुषपैतृकेषु कर्मसु विनियुङ्क्ते श्रुतिरिति प्रतीतिर्जायते ॥ अत्रापराह्णकाले विहितस्य पार्वणश्राद्ध
स्य वारस्य तृतीयांशो मानवः कर्तव्यतोपदेशको विनियोगः प्रकरणे दर्शयिष्यते ॥ सोऽपि त्रिधा विभ
क्तस्याह्नस्तृतीयो भागोऽपराह्ण इत्यत्रान्यार्थमदर्शनात्वनामुसंधेयः ॥ इति त्रिधा विभक्तस्य तृतीयो भा
गोऽपराह्ण इति मतं ॥ अथ विषमे भागे चतुर्धा विभक्तस्य तृतीयो भागोऽपराह्ण इत्यपरे ~~[illegible]~~
॥ तथा च गोभिलः ॥ पूर्वाह्णं प्रहरं सार्द्धं मध्याह्नं प्रहरं तथा ॥ आतृतीयादपराह्णं सायाह्नं च ततः परमिति ॥ १५
अत्र सूर्योदयात्प्रभृति सार्द्धप्रहरपरिमितं दिनभागं पूर्वाह्णं ॥ तदूर्ध्वं प्रहरपरिमितं मध्याह्नं तदूर्ध्वं तृ
तीयप्रहरसमाप्तिपर्यंतं मध्यप्रहरपरिमितं अपराह्णं ॥ तदूर्ध्वं प्रहरमात्रं सायाह्नमाहुरित्यर्थः ॥ इति च
तुर्धा विभक्तस्य तृतीयो भागोऽपराह्ण इति मतं ॥ अथ समविभागैः पंचधा विभक्तस्याह्नश्चतुर्थो भागोऽप
राह्ण इत्यपि मतं ॥ तत्र शातपथश्रुतिः ॥ आदित्यास्त्ववसवस्तत बोधदैवो देत्पथवसंतो [illegible]दा संगवोप

ग्रीष्मो यद्दा मध्यंदिनोऽथ वर्षा यदपराह्णोऽथ शरद् यदैवास्तमेत्यथ हेमंत इति ॥ एवं पंचदशारमुहू
र्त्तसंमितस्य दिवसस्य पंचधा क्रियमाणो त्रिमुहूर्त्तपरिमिताः प्रातरादयः पंच काला भवंति ॥ अत्र
यद्यपि तस्मादु मध्यंदिन एवादधीतेत्यनंतरमेवाम्नायस्याधानसंबंधे मध्यंदिनविधिः प्राप
न्ततया पंचधा विभागः श्रूयते ॥ तथापि प्रातरादिविहितैः कर्मभिराकांक्षितस्वकालपरिमा
णज्ञापकतायापजीव्यमानः सर्वकर्मसंबंधितां लभते ॥ अत एवायं त्रिमुहूर्त्तपरिमाणावय
वः पंचधा विभागः साधारण्येनैवह दृश्यते ॥ तथा तत्सभासरवंडे ॥ मुहूर्त्तत्रितयं प्रातस्तावानेव
च संगवः ॥ मध्याह्नस्त्रिमुहूर्त्तस्यादपराह्णोपि तादृशः ॥ सायाह्नस्त्रिमुहूर्त्तोऽथ सर्वकर्मबहिः कृत
इति ॥ उक्तं हि वायुपुराणे च ॥ मुहूर्त्तादष्टमादूर्ध्वं मुहूर्त्तान्नवमादधः ॥ स कालः कुतपो ज्ञेयः पि
तॄणां दत्तमक्षयमिति ॥ कालिकापुराणे ॥ ब्राह्मणाः कंबलो गावो रूप्याग्न्यतिथयः पवित्री ॥ ति
लाद्दर्भाश्च मध्याह्नो नवैते कुतपाः स्मृताः ॥ खड्गपात्रं दौहित्र एते कुतपाः स्मृताः ॥ [illegible] पितृ
यज्ञानुष्ठानरहितानग्निकर्तृकस्त्रीशूद्रादिकर्तृकं चादर्शश्राद्धं ॥ तत्रामावास्यायामपराह्णे पिंड

पितृयज्ञेन चरंतीति कस्मस्य ज्ञकारो ऽपराह्णकालानुष्ठेयपिंडपितृयज्ञोत्तरं कालसंविधेस्तद
नुसारेणासौ वत्रिधाविभक्तस्यापराह्णस्य तृतीयो भागो यथा संभासंध्यं ग्राह्यः ॥ तथाह मनुः ॥ पिंडान्वाहार्यकं
कश्राद्धं क्षीणे राजनि शस्यते ॥ वासरस्य तृतीयेंशे नातिसंध्यासमीपत इति ॥ तथा ॥ पितृयज्ञं तु निर्व
र्त्य विप्रश्चंद्रक्षयेऽग्निमान् ॥ पिंडान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकमिति ॥ नचैतद्वक्तव्यं ॥ पितृय
ज्ञं तु निर्वत्य तर्पणाख्यं च योऽग्निमान् ॥ पिंडान्वाहार्यकं कुर्याच्छ्राद्धमिंदुक्षये सदेति ॥ मत्स्यपुराणव
चनात्पंचमहायज्ञांतर्गततर्पणाख्यपितृयज्ञांतर्यमेवान्वाहार्यकस्य न पिंडपितृयज्ञानंतर्यमि
ति ॥ तदनुरोधेनापराह्णग्रहणमिति ॥ यतो लौगाक्षिरपि ॥ पक्षांतं कर्म निर्वर्त्य वैश्वदेवं च साग्निक   १३
ः ॥ पितृयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुध इति ॥ अतः पिंडपितृयज्ञादूर्ध्वं मनुष्ये यस्य दर्शश्राद्ध
स्य पितृयज्ञस्य समाप्त्यनुसारेणानावे संध्यासामीप्यपर्यंतावासरस्य तृतीयांशे ग्राह्यः स्वल्प
पराह्णकालविनियोगः ॥ आदित्यपुराणे ॥ देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनः ॥ आयांति तस्मादह
स्तं पुण्यं च सर्वदा ॥ तत्र दद्यात्सुवर्णं तु भूमिं गां तुरगं रथं ॥ छत्रं वस्त्रं च माल्यं च सर्वं नंचाशनं गृहं ॥

प्राङ्नाभिवर्द्धनात्पुंसो जातकर्म विधीयत इति॥ वर्द्धनं छेद॥ जैमिनिरपि॥ यावन्नाच्छिद्यते नालं तावन्नाप्नो
ति सूतकं॥ छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते॥ विष्णुधर्मोत्तरे मार्कंडेय आह॥ अच्छिन्ननाभ्यां क
र्त्तव्यं श्राद्धं वै पुत्रजन्मनि॥ आशौचे पूर्ववत्कार्यमथवा नियतात्मभिः॥ पुत्रजन्मन्यनाभिकर्त्तनात्पुरुषप
तदह्नो जातकर्म सश्राद्धं कुर्यात्पात्रादिसहिरण्यानि वा दद्यात्प्रजापतये वा नालाच्छिन्नायामाशौचं॥
अतो नालछेदात्पूर्वमेव श्राद्धं॥ एतच्च नैमित्तिकत्वाद्रात्रावपि कार्यं॥ तदाह व्यासः॥ रात्रौ स्नानं न कु
र्वीत दानं चैव विशेषतः॥ नैमित्तिकं च कुर्वीत स्नानं दानं च रात्रिषु॥ तथा॥ ग्रहणोद्वाहसंक्रांतियात्रा
र्त्तिप्रसवेषु च॥ दानं नैमित्तिकं ज्ञेयं रात्रावपि न दुष्यति॥ पुत्रजन्मनि यात्रायां शर्वर्यां दत्तमक्षयमि
ति॥ एतच्च तत्कालेऽसूतकांतरनिमित्ताशौचसन्निपाते सत्यपि कर्त्तव्यं॥ तदाह प्रजापतिः॥ सूतके तु समुत्पन्ने पुत्र
जन्म यदा भवेत्॥ कर्त्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यति॥ कर्त्तुर्जातकर्मकर्त्तुः॥ पूर्वं प्रवृत्तजन्माशौच
निवृत्तौ सत्यां सर्वः शुद्धो भवतीत्यर्थः॥ यदि पुनरिदं तत्काले द्विजन्मनः पकर्त्ताद्युत्पत्तिशौचांतरनिपाताद्दान
स तस्यां तदा सूतकनिवृत्तौ कल्पोक्तदिने जातकाल एव कार्यं॥ न तु स्वकालात्परिभ्रष्टमिदं किमिति

कालांतरे कर्त्तव्यं ॥ नह्युपरागादिकर्मणि निमित्तबंधना । निकर्माण्यपि तत्काले तिक्रमे पत्क्रियंते ॥ सत्यमेवं ॥ इदं तु व
चनात्क्रियंते ॥ तथा च विष्णुधर्मोत्तरे ॥ अच्छिन्ननाभ्यां कर्त्तव्यं श्राद्धं वै पुत्रजन्मनि ॥ आशौचोपरमे कार्यमथ वा नि
पतात्मजि रिति ॥ न त्वाशौचोपरमोपस्य कालः ॥ स तु नालच्छेदात्पूर्वकाले नासं भवति बंधन इत्येतत्तु न ॥ वैजवाप
न वचनाद्भ्रमः ॥ जन्मनोनंतरं कार्यं जातकर्म यथाविधि ॥ दैवादच्छिन्नकालं चेदतीते सूतके तु वेदिति ॥ अथानिमि
त्तकालत्वः ॥ तत्र व्याघ्रपादः आह ॥ स्मार्त्तकर्मपरित्यागो राहोरन्यत्र सूतके ॥ श्रौते कर्मणि तत्काले स्नातः शुद्धिमवा
प्नुयात् ॥ राहुसूतकादन्यसूतके श्राद्धं स्मार्त्तं श्राद्धादि कर्म न कुर्वीत । श्रौतं तु दर्शपौर्णमासाग्निहोत्रादि स्नात्वास
द्य एव कुर्यादित्यपरार्कः ॥ स हि जन्माशौचे राहुग्रस्तचंद्रार्कमोक्षे सूर्यकाले च सूतकमृतकशब्द प्रयोगोस्त्यत्वे निश्च
त्ये वं व्याख्यातवान् । अन्यथैवं व्याचक्षते ॥ सूतकेजन्माशौचे सर्वकर्मत्यागः कर्त्तव्यः ॥ स च राहोरन्यत्र स च रा
हुदर्शननिमित्तान्नि कर्माणि विग्रहायेत्यर्थः ॥ तत्र प्रथमव्याख्याने जन्ममरणाशौचयोर्द्वितीयव्याख्याने
तु जन्माशौचे श्राद्धं न कर्त्तव्यमिति सिद्धं भवति ॥ कर्मशब्दस्य प्रेतापिंडक्रियाव्यतिरिक्तकर्मविषयः ॥ तथा
च पैठीनसिः ॥ दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च ॥ प्रेतक्रियापिंडे वर्जमाशौचे विनिवर्त्तयेदिति ॥ ॥

११

सि

मनुशातातपौ॥ रात्रौ श्राद्धं न कर्त्तव्यं राक्षसी कीर्त्तिता हि सा॥ संध्ययोरुभयोर्वापि सूर्ये चैवाचिरोदित इति॥ रक्षांसि
स्यां चरंति बलवंति वा तत्र वंती निराक्षसी त्वच्यते॥ तस्यां हि रक्षोभिः श्राद्धमवलुप्यते॥ पूर्वापरयोरपि संध्ययो
ःश्राद्धं न कर्त्तव्यं॥ संध्ययोर्मानं तु याज्ञवल्क्याह॥ उदयात्प्राक् संध्या नु मूर्त्तद्वयमुच्यते॥ सायं संध्या त्रिघटि
काऽस्तादुपरि ज्ञास्वत इति॥ याज्ञवल्क्यादिस्मृतिषु॥ एवं दाहादिपालप वृद्धौ नांदीमुखान् पितॄन्पय
तस्मादित्तिर्वचने वृद्धिश्राद्धं च वृद्धवासिष्ठादिति द्विधीतं॥ पुत्रजन्मविवाहादौ वृद्धिश्राद्धमुदाहृतं इति
अत्रान्वदयिकश्राद्धविशेषवृद्धिश्राद्धशब्दः परिज्ञाप्यते॥ आदिशब्देन गर्भाधानपुंसवनसीमंतो
न्नयनव्यतिरिक्तानामन्नप्राशनचूडाकरणादिसंस्कारकर्मणां ग्रहणं गर्भाधानादिसंस्का
रत्रयांगत्वं तस्याभ्युदयिकस्य कर्मांगप्राधान्ये नाभिधानात्॥ एतच्च वृद्धिश्राद्धादिनवकर्मांगशब्दे
वदिति॥ पारस्केतिदेशे दर्शनात्॥ आदि[illegible]सारो॥ वैश्वदेवौ क्रतुदक्षौ सर्वास्विष्टिषु कीर्त्तितौ॥ नि
त्यं नांदीमुखश्राद्धे वसुसत्यौ च पैतृके॥ नवान्नलंभने देवौ कालःकामौ सदैव हि॥ अपिकल्पा

गते सूर्ये श्राद्धं चक्षुरिरोचनौ॥ पुरूरवार्द्रवौ चैव विश्वेदेवौ तु पार्वणे॥ इति॥ सर्वास्वपि तु सर्वेषु कर्मा
ग श्राद्धेषु नवान्नलाभतेन वा नवान्ननिमित्ते भवति॥ अतः श्राद्धनिमित्तसमवाये कालसमवाये देशो
क्तावकत्रैक्ये देवतैक्ये च विशेषग्रहणाभावात् तन्त्रेण सर्वश्राद्धानुष्ठानं कर्तव्यमिति॥ एवं च स
ति संक्रान्तिनिमित्तकममावास्यानिमित्तकं व्यतीपातनिमित्तकं चेत्येतानि श्राद्धानि तन्त्रेण करि
ष्य इति संकल्पं कुर्यात्॥ इति कालसमवायनिर्णयः॥ जीवत्पितृकस्यापि क्वचित् श्राद्धाधिकारः॥ मै
त्रायणीयपरिशिष्टे॥ उद्वाहे पुत्रजनने पित्र्येष्ट्यां सौमिके मखे॥ तीर्थे ब्राह्मण आयाते षडेते जीवतः पि
तुः॥ पुत्रस्य श्राद्धकाला इति शेषः॥ जीवत्पितृकस्याप्यप्रतिपदि मातामहश्राद्धं फलातिशयाय नियतं कार्यं
॥ जातमात्रेऽपि दौहित्रे विद्यमानेऽपि मातुले॥ कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते॥ तत्र पिता यदि जी
वति यत्नतः पिता दद्यात् तत्र एव पुत्रो दद्यात्॥ पितुः पितामहः प्रपितामहश्चेज्जीवति तद्दानकस्मैचिद्दद्या
त्॥ यस्य पिता प्रेतः स्यात् स तस्मै पिण्डं निधाय पितामहात्परं द्वाभ्यां दद्यात्॥ यस्य पिता प्रपितामहा

१८